# Pushkareshvaralinga Shivakshetra Mahatmyam

# પુષ્કરેશ્વરલિઙ્ગ શિવક્ષેત્ર મહાત્મ્યમ્

## Document Information

Text title : Pushkareshvaralinga Shivakshetra Mahatmyam

File name : puShkareshvaralingashivakShetramahAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 35|| -

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

# પુષ્કરેશ્વરલિઙ્ગ શિવક્ષેત્ર મહાત્મ્યમ્

(શિવગૌરીસંવાદે)

ઈશ્વરઃ -

શ્રૃણુ દેવિ કથામેકાં બ્રહ્મણઃ પરમાદ્ભુતામ્ ।
યાં શ્રુત્વા મયિ વિન્દન્તે ભક્તિં સર્વાર્થદાયિનીમ્ ॥ ૧॥

સત્યલોકે સ્થિતો બ્રહ્મા યિયક્ષુરભવચ્છિવે ।
સ્વહસ્તપદ્મં ધાતા ચ પાતયામાસ ભૂતલે ॥ ૨॥

ક્ષેત્રાણામુત્તમે તન્મે પુષ્કરે પુષ્કરં તદા ।
તત્ર મે સંસ્થિતં પૂર્વં પુષ્કરેશ્વરસઞ્જ્ઞિતમ્ ॥ ૩॥

લિઙ્ગં મઙ્ગલદં પુણ્યં તન્મૌલૌ નલિનં પતત્ ।
વેણુગુલ્માવૃતં ભદ્રં નાનાવૃક્ષસમન્વિતમ્ ॥ ૪॥

તત્રાન્તરેઽભવદ્વાણી શ્રુત્વા(?) વાણીપતિસ્તદા ॥

(વાણી બ્રહ્માણમવદત્ ઇતિ વક્તવ્યમ્ ।)

—

વાણી -

એતદ્વિધાતઃ ક્ષેત્રાણામુત્તમં પુષ્કરં શિવમ્ ।
યજતો દેવયજનં તવ ભૃયાત્ સુપાવનમ્ ॥ ૫॥

પુષ્કરં તે યતઃ પુણ્યં પતિતં પુષ્કરં હિ તત્ ।
અત્ર લિઙ્ગમિદં શ્રેષ્ઠં દેવદેવસ્ય શૂલિનઃ ॥ ૬॥

પશ્ય સમ્પૂજયાત્રૈવ કાર્તિકોઽયં સુપાવનઃ ।
માસો હિ પુણ્યનિલયે ગઙ્ગેયં પાવની સરિત્ ॥ ૭॥

કાર્તિકે સોમવારેષુ પુષ્કરે પુષ્કરેશ્વરમ્ ।
યઃ સમર્ચયિતા રાત્રૌ બિલ્વૈર્દ્રોણૈશ્ચ ધુત્તુરૈઃ ॥ ૮॥

તસ્ય પુણ્યસ્ય નાન્તોઽસ્તિ સ ચ શઙ્કરવલ્લભઃ ।
તદા વાણીવચઃ શ્રુત્વા વિશ્વકર્માણમાહ્વયત્ ॥ ૯॥

—

ઈશ્વરઃ -
બ્રહ્મણા સ્મૃતમાત્રઃ સ વિશ્વકર્મા તતો વિધિમ્ ।
પ્રાહ કિં કરવાણીતિ ક્ષેત્રં વિસ્તારયેતિ તમ્ ॥ ૧૦॥

વ્યધાદ્વેધાસ્તદા શાલામાશ્રમં સરિતસ્તટે ।
મણ્ટપં ગોપુરં દિવ્યં પુષ્કરેશસ્ય શૂલિનઃ ॥ ૧૧॥

તદ્બ્રહ્મણોવચઃ શ્રુત્વા નાનાશિલ્પસમન્વિતઃ ।
શાલાં નિર્માપયામાસ નાનામણ્ટપશોભિતામ્ ॥ ૧૨॥

ભક્ષ્યૈર્ભોજ્યૈસ્તથૈવાન્નૈઃ સૂપાપૂપૈર્મનોરમૈઃ ।
વાસસાં રાશયસ્તત્ર બ્રાહ્મણાવસથાદયઃ ॥ ૧૩॥

પુષ્કરેશ્વરલિઙ્ગસ્ય ચક્રે સોઽપિ શિવાલયમ્ ।
પ્રાકારગોપુરોપેતમાશ્રમૈઃ સુમનોહરમ્ ॥ ૧૪॥

તત્પિતામહવાક્યેન વિશ્વકર્માઽથ શિલ્પિરાટ્ ।
વિજ્ઞાપ્તુમથ બ્રહ્માણં સત્યલોકં ગતસ્તદા ॥ ૧૫॥

તત્ર સન્તિ મહાશૈવાઃ પુષ્કરૈશસમર્ચકાઃ ।
બિલ્વપત્રાદિભિઃ સમ્યક્ તે સર્વે ભસ્મભૂષણાઃ ॥ ૧૬॥

રુદ્રાક્ષહારવલયત્રિપુણ્ડ્રપરિશોભિતાઃ ।
નિવસન્તિ મહાશૈવાઃ પુષ્કરૈઃ પુષ્કરેશ્વરમ્ ॥ ૧૭॥

સમર્ચયન્તિ નિયતં ભક્ત્યા બિલ્વૈશ્ચ કોમલૈઃ ।
તત્તત્કાલેન દેવેશિ પુષ્કરં મે સુરાસુરૈઃ ॥ ૧૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે પુષ્કરેશ્વરલિઙ્ગ શિવક્ષેત્ર મહાત્મ્યમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૩૫॥ -

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 35.. -

Notes:

Pushkara Kshetra came to be known so due to a Lotus that fell from the hands of Brahma from Satyaloka, on to a Shivalinga in this region in Prithviloka. A temple was

thus constructed there by Vishwakarma around the Shivalinga, that came to be known as Pushkareshwara. Shiva iterated the importance of worshipping at Pushkareshwara during Kartika-masa especially on Mondays (Somavara).

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Pushkareshvaralinga Shivakshetra Mahatmyam*
pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*